श्री दुर्गा सप्तश्लोकी

श्री दुर्गा सप्तश्लोकी

शिव उवाच |
देवी त्वं भक्तसुलभे सर्वकार्यविधायिनि |
कलौ हि कार्यसिद्ध्यर्थमुपायं ब्रूहि यत्नतः ||

देव्युवाच |
शृणु देव प्रवक्ष्यामि कलौ सर्वेष्टसाधनं |
मया तवैव स्नेहेनाप्यंबास्तुतिः प्रकाश्यते ||

अस्य श्री दुर्गा सप्तश्लोकी स्तोत्रमंत्रस्य नारायण ऋषिः, अनुष्टुप् छंदः, श्री महाकाळी महालक्ष्मी महासरस्वत्यो देवताः, श्री दुर्गा प्रीत्यर्थं सप्तश्लोकी दुर्गापाठे विनियोगः |

ज्ञानिनामपि चेतांसि देवी भगवती हि सा |
बलादाकृष्य मोहाय महामाया प्रयच्छति || 1 ||

दुर्गे स्मृता हरसि भीतिमशेषजंतोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि |
दारिद्र्यदुःख भयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्र चित्ता || 2 ||

सर्वमंगळमांगळ्ये शिवे सर्वार्थसाधिके |
शरण्ये त्र्यंबके गौरी नारायणि नमोऽस्तु ते || 3 ||

शरणागतदीनार्तपरित्राणपरायणे |
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते || 4 ||

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते |
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते || 5 ||

रोगानशेषानपहंसि तुष्टा-
रुष्टा तु कामान् सकलानभीष्टान् |
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयांति || 6 ||

सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि |
एवमेव त्वया कार्यमस्मद्वैरि विनाशनं || 7 ||

इति श्री दुर्गा सप्तश्लोकी |